व्याप्ति-पञ्चकम् ।

महामहोपाध्याय मथुरानाथ तर्कवागीश
कृत टीका समेतम् ।

[वा]राणसीस्थ श्रीमन्मिथिलेश संस्थापित संस्कृत विद्यामन्दिर
दर्शन शास्त्राध्यापक
तर्कभूषणोपाधिक श्रीप्रमथनाथ भट्टाचार्य्य
कृत रहस्य विवृति सहितम् ।

तदन्तेवासि
श्रीचन्द्रधर भट्टाचार्य्येण
काश्यां यज्ञेश्वर यन्त्रालयतः
प्रकाशितं

सम्वत्
१९५४

श्रीकाशी।

व्याप्ति-पञ्चकम्।

नन्वनुमितिहेतुव्याप्ति-ज्ञाने का व्याप्तिः ?

अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपण मारभते नन्वित्यादिना। अनुमितिहेत्वित्यस्यानुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यर्थः। व्याप्तिज्ञान इत्यत्र च विषयत्वंसप्तम्यर्थः। तथाचानुमाननिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयीभूताव्याप्तिः केत्यर्थः। अनुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यनेन व्याप्तेरनुमानप्रामाण्योपपादकत्वकथनात् अनुमानप्रामाण्यनिरूपणानन्तरं व्याप्तिनिरूपणे उपोद्घात एव सङ्गतिरिति सूचितं। उपपादकत्वञ्चात्र ज्ञापकत्वं।

केचित्तु अनुमितिपदं अनुमितिनिष्ठेतरभेदानुमितिपरं। तथाचानुमितिनिष्ठेतर-भेदानुमितौ यो हेतुः प्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वरूप स्तद्घटकं यद्व्याप्तिज्ञानं तदंशे विशेषणीभूताव्याप्तिः केत्यर्थः। घटकत्वार्थकसप्तमीतत्पुरुषसमासात्।

तथाच प्रागुक्तानुमितिलक्षणोपोद्घातसङ्गतिरनेन सूचितेत्याहुः।

नतावदव्यभिचरितत्वं, तद्धि न साध्याभाववदवृत्तित्वं । १ ।

नतावदिति । तावत् वाक्यालङ्कारे, अव्यभिचरितत्वं अव्यभिचरितत्वशब्दप्रतिपाद्यमित्यर्थः । तद्धीति हि यस्मात्, तथाच व्याप्तिर्यतः साध्याभाववदवृत्तित्वादिरूपाव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपा न अतः अव्यभिचरितत्वशब्द प्रतिपाद्यस्वरूपा नेत्यर्थः पर्य्यवसितः ।

विशेषाभावकूटस्य सामान्याभावहेतुता प्रसिद्धैवेति, इत्यमेव नञ्द्वयोरुपादानं सार्थकं । तदव्यभिचरितत्वं, नेति सर्व्वस्मिन्नेव लक्षणे सम्बध्यते ।

साध्याभाववदवृत्तित्वमिति । वृत्तं वृत्तिर्भावे निष्ठाप्रत्ययात्, वृत्तस्याभावोऽवृत्तं वृत्त्यभाव इति यावत्, साध्याभाववतोऽवृत्तं साध्याभाववदवृत्तं साध्याभाववद्वृत्त्यभावइति यावत्; तद् यत्रास्ति स साध्याभाववदवृत्ती मत्वर्थीयेन् प्रत्ययात्, तस्य भावः साध्याभाववदवृत्तित्वं । तथाच साध्याभाववद्वृत्त्यभाववत्त्वमिति फलितमिति प्राञ्चः ।

तदसत्, "न कर्म्मधारयान्मत्वर्थीयोवहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर" इत्यनुशासनविरोधात् तत्र कर्म्मधारयपदस्य वहुव्रीहीतर-समासपरत्वात् तच्चागुणवत्त्वमितिसाधर्म्म्यव्याख्यानावसरे गुणप्रकाशरहस्ये तद्दीधितिरहस्ये च स्फुटं । अव्ययीभावसमासोत्तरपदार्थेन समं तत्समासानिविष्टपदार्थान्तरान्वयस्याव्युत्पन्नत्वाच्च । भूतले उपघटं, भूतले अघटमित्यादौ भूतलवृत्तिघटसमीपतदत्यन्ताभावयोरप्रतीतेः ।

एतेन वृत्तेरभावोऽवृत्तोत्यव्ययीभावानन्तरं साध्याभाववतोऽवृत्ति यत्रेति वहुव्रीहिरित्यपि प्रत्युक्तं। वृत्तौ साध्याभाववतोऽन्वयानुपपत्तेः अव्ययीभावसमासस्याव्ययतया तेनसमं, समासान्तरासम्भवाच्च, नञुपाध्यादिरूपाव्ययविशेषाणामेव समस्यमानत्वेन परिगणितत्वात्। वस्तुतस्तु साध्याभाववतोन वृत्तिर्यत्रेति त्रिपदव्यधिकरणवहुव्रीह्यनन्तरं त्वप्रत्ययः साध्याभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः। अन्वयश्चास्य वृत्तौ। तथाच साध्याभावाधिकरणनिरूपितवृत्त्यभाववत्वमव्यभिचरितत्वमिति फलितं। नच व्यधिकरणवहुव्रीहिः सर्व्वत्र न साधुरिति वाच्यं अयं हेतुः साध्याभाववदवृत्तिरित्यादौ व्यधिकरणवहुव्रीहिं विना गत्यन्तराभावेनात्रापि व्यधिकरणवहुव्रीहेः साधुत्वात्। साध्याभावाधिकरणवृत्त्यभावश्च तादृशवृत्तित्वसामान्याभावोवोध्यः। तेन धूमवान् वह्नेरित्यादौ धूमाभाववज्जलह्रदादिवृत्त्यभावस्य धूमाभाववद्वृत्तित्वजलत्वोभयत्वावच्छिन्नाभावस्यच वह्नौ सत्त्वेऽपि नातिव्याप्तिः। वृत्तिश्च हेतुतावच्छेदकसम्बन्धेन विवक्षणीया तेन वह्न्यभाववति धूमावयवजलह्रदादौ समवायकालिकविशेषणतादिना धूमस्य वृत्तावपि न क्षतिः। साध्याभावश्च* साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदका-

---

* साध्याभावश्चेति—साध्याभावश्चात्र [साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः। प्रतियोगितायां तादृशरूपवृत्तित्वञ्च स्वावच्छेदकतात्वावच्छि-

वच्छिन्नप्रतियोगिताको बोध्यः। तेन वह्निमान् धूमादित्यादौ समवायादिसम्बन्धेन वह्निसामान्याभाववति संयोगेन तत्तद्वह्नित्ववह्निजलोभयत्वाद्यवच्छिन्नाभाववति च पर्व्वतादौ संयोगेन धूमस्य वृत्तावपि न क्षतिः। ननु तथापि गुणत्ववान् ज्ञानत्वात् सत्तावान् जातेरित्यादौ विषयित्वाव्याप्यत्वादिसम्बन्धेन तादृशसाध्याभाववति ज्ञानादौ ज्ञानत्वजात्यादेर्व्वर्त्तमानत्वादव्याप्तिः नच साध्याभावाधिकरणत्वमभावीयविशेषणताविशेषेण विवक्षितमितिवाच्यं, घटत्वात्यन्ताभाववान् घटान्योन्याभाववान् वा पटत्वादित्यादौ साध्याभावस्य घटत्वादेर्विशेषणताविशेषसम्बन्धेनाधिकरणत्वाप्रसिद्ध्या ऽव्याप्तेरिति चेन्न, साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वस्य विवक्षितत्वात्। वृत्त्यन्तं प्रतियोगिता विशेषणं। तादृशसम्बन्धश्च वह्निमान् धूमादित्यादौ भावसाध्यकस्थले विशे-

---

न्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन बोध्यः साध्यतावच्छेदकताप्रतियोगिकेत्यादिकथने विषयितया प्रतियोगितया वा महानसीयवह्नेः साध्यत्वे तद्व्यक्तित्वहेतौ अव्याप्त्यापत्तिरतः साध्यतावच्छेदकतात्वावच्छिन्नत्वं तादृशप्रतियोगितायां विशेषणमुपात्तं, एवं सम्बन्धदले तादृशप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नत्वविशेषणस्यापि फलं वह्निमान् धूमादित्यादौ महानसीयवह्न्याद्यभावमादाय प्रसञ्जिताया अव्याप्तेर्वारणमिति विभावनीयं सर्व्वत्र सामान्याभावनिवेशे एषएव प्रकारः समाश्रयणीयः।

षणताविशेष एव घटत्वाभाववान् पटत्वादित्याद्यभावसाध्यकस्थले तु यथायथं समवायादिरेव, समवायविषयित्वादिसम्बन्धेन प्रमेयादिसाध्यके ज्ञानत्वादिहेतौ साध्यतावच्छेदकसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाद्यभावस्य कालिकादिसम्बन्धेन योऽभावः सोऽपि प्रमेयतया साध्यान्तर्गतस्तदीयप्रतियोगितावच्छेदककालिकादिसम्बन्धेन साध्याभावाधिकरणे ज्ञाने ज्ञानत्वादेर्हेतोरव्याप्तिवारणाय सामान्यपदोपादानं। साध्यसामान्यीयत्वञ्च यावत्साध्यनिरूपितत्वं स्वानिरूपकसाध्यकभिन्नत्वमिति यावत्, अस्यैकोक्तिमात्रपरतया गौरवस्यादोषत्वात् कारणतावच्छेदकेच भावसाध्यकस्थलेऽभावीयविशेषणताविशेषसम्बन्धेन साध्याभावाधिकरणत्वं ; अभावसाध्यकस्थले च यथायथं समवायादिसम्बन्धेन साध्याभावाधिकरणत्वमुपादेयं। साध्यभेदेन कारणताभेदात्। नच तथापि घटान्योन्याभाववान् पटत्वादित्यत्रान्योन्याभावसाध्यके घटत्वादिरूपसाध्याभावे न साध्यप्रतियोगित्वं नवा समवायादिसम्बन्ध स्तदवच्छेदकस्तादात्म्यस्यैव तदवच्छेदकत्वादित्यव्याप्तेस्तादवस्थ्यमिति वाच्यं। अत्यन्ताभावाभावस्य प्रतियोगिस्वरूपत्वेन घटभेदस्य घटभेदात्यन्ताभावत्वावच्छिन्नाभावरूपतया घटभेदात्यन्ताभावरूपस्य घटभेदप्रतियोगितावच्छेदकीभूतघटत्वस्यापि समवायादिसम्बन्धेन घटभेदप्रतियोगित्वात्। नचान्यत्रात्यन्ताभावाभावस्य प्रतियोगिरूपत्वेपि घटभेदात्यन्ताभावाभावो न घटभेदस्वरूपः। किन्तु प्रतियोगितावच्छेदकीभूतघटत्वात्यन्ताभावरूप एवेति-

सिद्धान्त इति वाच्यं । यथाहि घटत्वावच्छिन्नघटवत्त्वग्रहे घटात्यन्ताभावाग्रहाद्धटात्यन्ताभावाभावव्यवहाराच्च घटात्यन्ताभावाभावोघटस्वरूपः तथा घटभेदवत्त्वगृहे घटभेदात्यन्ताभावागृहात् घटभेदात्यन्ताभावाभावव्यवहाराच्च घटभेदएव तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकोऽभाव इति तत्सिद्धान्तो न युक्तिसहः । विनिगमकाभावेनापि घटत्वत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववद्धटभेदस्यापि घटभेदात्यन्ताभावाभावत्वसिद्धेरप्रत्यूहत्वाच्च । अतएव तादृशसिद्धान्तो नोपाध्यायसम्मतः । अतएव "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" इत्याचार्य्याः । अन्यथा घठभेदात्यन्ताभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्त्यापत्तेः, अन्योन्याभावस्य प्रतियोगितावच्छेदकघटत्वाद्यभावे तल्लक्षणस्यातिव्याप्तेश्च नवा ऽन्योन्याभावप्रतियोगितावच्छेदके तल्लक्षणस्यातिव्याप्त्यापत्ति रिष्टापत्तेः । नचैवं घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वापत्तिरितिवाच्यं, तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपत्वाभ्यूपगमात् तद्वत्ताग्रहे तादृशतदत्यन्ताभावाभावस्यैव व्यवहारात् उपाध्यायैर्घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वाभ्युपगमाच्च ।

नचैवं साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विवक्ष्यतां किं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तित्वस्य प्रतियोगिताविशेषणत्वेने-

ति वाच्यं। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्व*

* आत्मत्वप्रकारकप्रमाविशेष्यत्वेति अत्र कालिकसम्बन्धेन आत्मत्वाभावस्य स्वरूपेण साध्यत्वे साध्यनिरूपित-प्रतियोगितावाच्छेदकस्वरूपसम्बन्धमादाय नाव्याप्तिः सम्भवति तेन सम्बन्धेन साध्याभावस्यात्मत्वस्याधिकरणाप्रसिद्धेः अनायत्या कालिकसम्बन्धमादाय साध्याभावाधिकरणत्वप्रसिद्धेरावश्यकत्वात् इति तादृशप्रमाविशेषत्वपर्य्यन्तानुधावनं।

साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धसामान्येन तादृश-प्रतियोगितावच्छेदकीभूतो योयः सम्बन्धः प्रत्येकं तत्तत्सम्बन्धेन वा साध्याभावस्य अधिकरणत्वं विवक्षणीयं—इत्याशङ्काद्वये ऽपि अव्याप्तिदानाय प्रमायां आत्मत्वप्रकारकत्वविशेषणमुपात्तं प्रमाविशेष्यत्वमात्रस्य कालिकेन यो ऽभावः तस्य स्वरूपेण साध्यत्वे द्वितीयाशङ्कायां—अव्याप्तिर्न सम्भवतीति सुधीभिर्विभाव्यं इतिकेचित्।

ननु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकतादृशप्रमाविशेष्यत्वाभावस्य स्वरूपेण स्वप्रतियोगितादृशविशेष्यत्वानधिकरणघटाद्यवच्छेदेन काले ऽपि वर्त्तमानतया केवलान्वयित्वेन तत्साध्यकाव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्न-प्रतियोगिताकसाध्याभावपर्य्यन्तानुधावनं सन्दर्भविरुद्धं प्रतिभाति केवलान्वयिन्यव्याप्तेर्ग्रन्थकृत्स्वीकृतत्वात् इति चेन्मैवं।

गगणाभावस्य कालिकसम्बन्धेन यो ऽभाव स्तस्यविशेषणताविशेषेण साध्यत्वे आत्मत्वहेतौ अव्याप्तिवारणार्थमेव तादृशप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिकसाध्याभाववृत्तित्वविशेषणस्य सार्थक्यसम्भवात्।

प्रकारकप्रमाविशेष्यत्वाभावस्य विशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः । कालिकसम्बन्धावच्छिन्न-साध्याभावस्य विशेषणताविशेषसम्बन्धेन योऽभावस्तस्यापि साध्यरूपतया कालिकसम्बन्धवत् विशेषणताविशेषोऽपि साध्यीयप्रतियोगितावच्छेदकः सम्बन्धः, तेन सम्बन्धेनात्म-त्वप्रकारकप्रमाविशेष्यत्वरूपसाध्याभाववति आत्मनि हेतोरात्म-त्वस्य वृत्तेः । प्रतियोगितावच्छेदकवत् प्रतियोग्यपि अन्यो-न्याभावाभावः* । तेन तादात्म्यसम्बन्धेन साध्यतायां सा-

---

अयमपि साध्याभावः साध्यसामान्याभावो बोध्यः—अन्यथा पूर्व्वक्षणवृत्तित्वविशिष्टतादृशसाध्यस्य योऽभावः तस्य स्वरूपेण योऽभावः पूर्व्वक्षणवृत्तित्वविशिष्टसाध्यरूपः सोऽपि शुद्धसाध्यानतिरिक्त इति तदीयप्रतियोगितावच्छेदकस्वरूपसम्बन्धमादाय पुनरप्युक्तस्थले अव्याप्तिप्रसङ्गादिति ।

* अथैवं घटभिन्नं कपालत्वादित्यत्र अव्याप्तिः समवायरूपतादृशसम्बन्धेन साध्याभावघटाधिकरणे कपाले हेतोर्विद्यमानत्वादिति चेत्केचित्तु सम्प्रदायविदः स्वावच्छेदकसम्बन्धावच्छिन्नत्वसामानाधिकरण्योभयसम्बन्धेन तादृशप्रतियोगिताविशिष्टसाध्याभावत्वा ऽवच्छिन्ननिरूपकताकाधिकरणत्वस्य प्रवेशान्नोक्तस्थले अव्याप्तिः सम्भवतीति वदन्ति तन्न, विचारसहं—अस्यैकोक्तिमात्रपरतया गौरवस्यादोषत्वात् कारणतावच्छेदके च भावसाध्यके ऽभावीयविशेषणताविशेषेणेत्यादि मथुरानाथोक्त विरोधापत्तेः प्रतियोगितायां तादृशसाध्याभाव-वृत्तित्वस्य अत्यन्ताभावत्वनिरूपितत्वस्यच विशेषणद्वयस्य व्यर्थताप्रसङ्गाच्च । अत्र नव्याः घटभेदाभाववान् घटः ननु क-

ध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यीयप्रति - योगित्वस्य नामसिद्धिः । इत्थञ्चात्यन्ताभावत्वनिरूपितत्वे-नापि साध्यसामान्यीयप्रतियोगिता विशेषणीया । अन्यथा*

पालं इति प्रतीतेः सर्व्ववादिसिद्धत्वेन तत्प्रामाण्यानुरोधात् घटभेदाभावत्वावच्छिन्नाधिकरणतायाः घट एव स्वीकारेण सा-ध्याभावत्वाच्छिन्नाधिकरणतायाः कपाले विरहान्नोक्ताव्याप्ते-रवकाश इति परैरनालोचितोऽयं पन्थाः इति प्राहुः ।

* घटभिन्नं घटत्वत्वादिति । ननु अत्यन्ताभावत्वनि-रूपितत्वं साध्यीयप्रतियोगितायां किमर्थं निवेशितं भेदाभा-वस्य प्रतियोगिरूपत्वेऽपि व्याप्तिलक्षणे निरुक्त-साध्याभाव-त्वावच्छिन्नाधिकरणताया एव प्रवेशेन घटभिन्नं घटत्वत्वात् इत्यादौ वृत्त्यनियामकतया तादात्म्यस्य साध्यसामान्यीयप्रतियो-गितावच्छेदकस्यापि धर्त्तुमशक्यत्वेन मथुरानाथप्रदर्शिताव्या-प्तेरनवकाशात् इति चेदत्र साम्प्रदायिकाः, वृत्त्यनियामकसम्ब-न्धावच्छिन्नप्रतियोगिताकाभावाङ्गीकारपक्षे स्वामित्वादिसम्ब-न्धावच्छिन्नप्रतियोगिताकधनाभावस्य साध्यतायां तद्व्यक्ति-त्वादिहेतौ साध्यीयप्रतियोगितावच्छेदकीभूतस्वामित्वसम्बन्धे-नाधिकरणत्वाप्रसिद्ध्या अव्याप्त्यापत्तेः प्रकृतलक्षणे साध्याभाव-त्वावच्छिन्नसम्बन्धिताया एव प्रवेश आवश्यक इत्थञ्च सा-ध्यीयप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन साध्याभावघटत्वा-दिसम्बन्धिनि घटत्वत्वादिहेतौ विद्यमानत्वेन घटादिभेदे साध्ये घ-टत्वत्वादिहेतावव्याप्तिरतस्तद्वारणाय प्रतियोगिताया मत्यन्ताभा-वत्वनिरूपितत्वनिवेशनमिति वदन्ति । तन्न समीचीनं, संयोगव-द्भेदाभावस्यातिरिक्तत्वमभ्युपगच्छतः मथुरानाथस्य संयोगवद्भे-

घटान्योन्याभाववान् घटत्वत्वादित्यादावव्याप्त्यापत्तेः । ता-

दाभावस्येव वृत्त्यनियामकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावस्याप्यतिरिक्तत्वमेव इष्टमिति स्वामित्वादि-सम्बन्धावच्छिन्नाभावसाध्यकसद्धेतौ साध्याभावस्य अतिरिक्ततया साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन विशेषणताविशेषेण अतिरिक्तसाध्याभावस्याधिकरणत्वप्रसिद्धिसम्भवेन अव्याप्त्यनवकाशात्; चैत्रे स्वामित्वसम्बन्धेन धनाभावोनास्तीति नञ्-समभिव्याहृतानुयोगिवाचकपदप्रकृतिकसप्तम्याः अधिकरणत्वावगाहि-शाब्दप्रमानिर्व्वाहकत्वानुरोधेन वृत्त्यनियामकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावस्यातिरिक्ततायाः सिद्धेरप्रत्यूहत्वाच्च नचैवं "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" इत्याचार्य्यलक्षणस्य स्वामित्वेन धनाद्यभावप्रतियोगिनि धनादौ अव्याप्तिरितिवाच्यं प्रतियोगित्वलक्षणाव्याप्तिनिरासाय धनादेः स्वामित्वसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावाभावरूपत्वाङ्गीकारे ऽपि पूर्व्वोक्ताधिकरणत्वावगाहिप्रतीतेः प्रमात्वानुरोधेन स्वामित्वेन धनाभावाभावस्यातिरिक्तरूपताया अवश्य-मङ्गीकरणीयत्वात् ।

वस्तुतस्तु अधिकरणत्वादेरिव सम्बन्धितायां अपि अनुगताकारपृथग्धीविशेषसिद्धतया विनिगमनाविरहेण साध्याभावाधिकरणघटितव्याप्तेरिव साध्याभावसम्बन्धिताघटितव्याप्तेरपि व्यतिरेकिसाध्यकानुमितिप्रयोजकताया दुष्परिहरणीयतया तादृशसम्बन्धिताघटकव्याप्तिलक्षणस्य घटभिन्नं घटत्वत्वादित्यादौ अव्याप्तिव्यावर्त्तनाय परिचायकशरीरे अत्यन्ता-भावत्वनिरूपितत्वं तादृशप्रतियोगितायां अवश्यं निवेशनीयमिति निपुणमतिभिरूहनीयं ।

दात्म्यसम्बन्धस्यापि साध्याभाववृत्तिसाध्यीयप्रतियोगितावच्छेदकसम्बन्धत्वात्।

यद्वा साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयनिरुक्तप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विवक्षणीयं। वृत्त्यन्तमन्यतरविशेषणं। एवञ्च घटान्योन्याभाववान् पटत्वादित्यादौ साध्याभावस्य घटत्वादेः साध्यप्रतियोगिकत्वविरहेपि न क्षतिः, तादृशान्यतरस्य प्रतियोगितावच्छेदकत्वस्यैव तत्र सत्वात्। नच तथापि कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति वाच्यं। निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या निरुक्तसंसर्गकनिरवच्छिन्नाधिकरणता तदाश्रयावृत्तित्वस्य विवक्षितत्वात्। गुणकर्म्मान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ सत्तात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृत्तित्वेऽपि साध्याभावत्वविशिष्टनिरूपिताधिकरणत्वस्य गुणाद्यवृत्तित्वान्नाव्याप्तिः। नचैवं कपिसंयोगाभाववान् प्रमेयत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिरितिवाच्यं केवलान्वयिन्यभावादित्यनेन ग्रन्थकृतैव तद्दोषस्य वक्ष्यमाणत्वात्। नच तथापि कपिसंयोगिभिन्नं गुणत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याव्याप्तिः अन्योन्याभावस्य व्याप्यवृत्तितानियमवादिनये तस्य केवलान्वय्यनन्तर्गतत्वादिति वाच्यं अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये अन्योन्याभावात्यन्ताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वे ऽपि अ-

व्याप्य वृत्तिमदन्योभावाभावस्य व्याप्यवृत्तिस्वरूपस्यातिरिक्त-स्याभ्युपगमात् । तच्चाग्रे स्फुटीभविष्यति ।

ननु तथापि समवायादिना गगणादि हेतुके इदं वह्निमद्-गगणादित्यादावतिव्याप्तिः । वन्ह्यभाववति हेतुतावच्छेदक-समवायसम्बन्धेन गगणादेरवृत्तेः । नच तल्लक्ष्यमेव हेतुता वच्छेदकसम्बन्धेन पक्षधर्म्मत्वाभावाच्चासद्धेतुत्वव्यवहार इति वाच्यं तत्र व्याप्तिभ्रमेणैवानुमितेरनुभवसिद्धत्वात् अन्य-था धूमवान् वन्हेरित्यादेरपि लक्ष्यत्वस्य सुवचत्वाच्च । ए-वं गुणकर्म्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः विशिष्टस-त्त्वस्य केवलसत्त्वानतिरिक्ततया द्रव्यत्वाभाववति गुणादौ तस्य वृत्तेः गुणे गुणकर्म्मान्यत्वविशिष्टसत्तेतिप्रतीतेः सर्व्व-सम्मतत्वात् । सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च सत्ता-भाववति सामान्यादौ समवायसम्बन्धेन वृत्तेरप्रसिद्धेरिति चेन्न हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणताप्रतियोगिकहेतुता-वच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषस--म्बन्धेन निरुक्त-साध्याभावत्वविशिष्टनिरूपितनिरुक्तसंसर्ग-क-निरवच्छिन्नाधिकरणताश्रय वृत्तित्व-सामान्याभावस्य वि-वक्षितत्वात् । वृत्तिश्च हेतुतावच्छेदक-सम्बन्धेन न वि-वक्षणीया । अस्तिच, सत्तावान् द्रव्यत्वादित्यादौ स-त्ताभावाधिकरणतावद्वृत्तित्वस्य हेतुतावच्छेदक-समवायसम्ब-न्धावच्छिन्नाधेयतानिरूपित विशेषणताविशेष-सम्बन्धेन सा-मान्याभावोद्रव्यत्वादौ, समवाय-सम्बन्धावच्छिन्नाधेयतानि-रूपित-विशेषणताविशेष-सम्बन्धानवच्छिन्न-प्रतियोगिताक-स -

त्ताभावाधिकरणतावद्वृत्त्यभावस्य व्यधिकरणसम्बन्धावच्छि-न्नाभावतया संयोगसम्बन्धावच्छिन्नगुणाभावादेरिव केवला-न्वयित्वात्।

• द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभावाधिकरणगुणादिवृत्तित्वस्यैव समवायसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषेण सत्तायां सत्त्वान्नातिव्याप्तिः। द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिवारणाय प्रतियोगिकान्तमाधेयताविशेषणं। वस्तुतस्तु, एतल्लक्षणकर्त्तृनये विशिष्टसत्त्वं विशिष्टसत्तानिरूपिताधिकरणतासम्बन्धेनैव द्रव्यत्वव्याप्यं नतु समवायसम्बन्धेन तथाच प्रतियोगिकान्तमाधेयताविशेषणमनुपादेयमेव। तदुपादाने हेतुतावच्छेदकभेदेन कार्य्यकारणभावभेदापत्तेः।

हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वे सतीत्यनेनापि विशेषणीयत्वात्, वन्हिमान् गगणादित्यादौ नातिव्याप्तिः। ननु तथापि उभयत्वमुभयत्रैवपर्य्याप्तं नत्वेकत्रेतिसिद्धान्तादरे घटत्ववान् घटपटोभयत्वादित्यादौ पर्य्याप्त्याख्यसम्बन्धेन उभयत्वहेतुकेऽतिव्याप्तिः।

घटत्वाभाववति हेतुतावच्छेदकपर्य्याप्त्याख्यसम्बन्धेन हेतोरवृत्तेः। घटो न घटपटोभयमितिवत् घटे न घटपटोभयत्वमितिप्रतीतेरितिचेन्न ; तादृशसिद्धान्तादरे हेतुतावच्छेदकसम्बन्धेन साध्यसमानाधिकरणत्वे सतीत्यनेनैव विशेषणीयत्वादिति। अतएव निविशतां वृत्तिमत्त्वं साध्यसमानाधिकरणत्वमेवेति केवलान्वयिग्रन्थे दीधितिकृतोक्तं। केचित्तु निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या विशेषणताविशेषसम्बन्धेन यथोक्तसम्बन्धेन वा निरवच्छिन्नाधिकरणता

तदाश्रयव्यक्तयवच्छेदकसम्बन्धावच्छिन्नयद्धर्म्मावच्छिन्नाधिकरणत्वसामान्यं तद्धर्म्मावच्छिन्नत्वं विवक्षणीयं धूमवान् वन्हेरित्यादौ पर्व्वतादिनिष्ठवन्ह्यधिकरणताव्यक्ते धूमाभावाधिकरणावृत्तित्वेपि अयोगोलकनिष्ठवन्ह्यधिकरणताव्यक्तेरतथात्वान्नातिव्याप्तिरित्याहुः ।

अन्येतु हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नाधिकरणताश्रयवृत्तियन्निरवच्छिन्नाधिकरणत्वं तदवृत्तिनिरुक्तसाध्याभावत्वविशिष्टनिरूपितयथोक्तसम्बन्धावच्छिन्नाधिकरणतात्वकत्वमितिविशेषणविशेष्यभावव्यत्यासेतात्पर्य्यं स्वपदं हेतुपरं । इत्थञ्च कपिसंयोगाभाववान् सत्त्वात् कपिसंयोगिभिन्नं गुणत्वादित्यादावपि नाव्याप्तिरितिसंक्षेपः ॥ १ ॥

साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं । २ ।

साध्यवद्भिन्नेति । साध्यवद्भिन्नोयः साध्याभाववान् तदवृत्तित्वमित्यर्थः । कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय साध्यवद्भिन्नेतिपदं साध्याभाववतोविशेषणमितिप्राञ्चः । तदसत् साध्याभाववदित्यस्य व्यर्थत्वापत्तेः साध्यवद्भिन्नावृत्तित्वमित्यस्यैव सम्यक्त्वात् । नव्यास्तु साध्यवद्भिन्नेयः साध्याभावः तद्वदवृत्तित्वमितिसप्तमीतत्पुरुषोत्तरं मतुप्प्रत्ययः तथाचसाध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः । एवञ्च साध्यवद्भिन्नवृत्तीत्यनुक्तौ संयोगी द्रव्यत्वादित्यादावव्याप्तिः संयोगाभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः, तदुपादाने च संयोगवद्भिन्नवृत्तिर्संयोगाभावो गुणादिवृत्तिर्संयोगाभाव एवाधिकरणभेदेनाभावभेदात्तद्वदवृत्ति-

स्वाप्न्याप्तिः । नच तथापि साध्यवद्भिन्नावृत्तित्वमित्येवास्तु किं साध्याभाववदित्यनेनेतिवाच्यं यथोक्तलक्षणे तस्याप्रवेशेन वैयर्थ्याभावात् तस्यापि लक्षणान्तरत्वात्, नच साध्यवद्भिन्न-वृत्तिर्यस्तद्वद्वृत्तित्वमेवास्तु किं साध्याभावपदेनेतिवाच्यं हे-तोस्तादृशद्रव्यत्वादिमद्वृत्तित्वादसम्भवापत्तेः साध्याभावेत्यत्र साध्यपदमप्यतएव द्रव्यत्वादेरपिद्रव्यत्वाभावाभावत्वाद्भावरू-पाभावस्यचाधिकरणभेदेन भेदाभावात् । ननु तथापि घटा-काशसंयोगघटत्वान्यतराभाववान् गगणत्वादित्यत्र घटानधि-करणदेशावच्छेदेन घटाकाशसंयोगाभावस्य गगणे सत्त्वात् सद्धेतुतया अव्याप्तिः, साध्यवद्भिन्ने घटे वर्त्तमानस्य सा-ध्याभावस्य घटाकाशसंयोगरूपस्य गगणेपि सत्त्वात् तत्रच हे-तोर्वृत्तेः । नच साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववत्त्वं विवक्षितमितिवाच्यं साध्याभावपदवैयर्थ्यापत्तेः । साध्य-वद्भिन्नवृत्तित्वविशिष्टस्यैव सम्यक्त्वादितिचेन्न अभावाभाव-स्यातिरिक्तत्वमतेनैवैतल्लक्षणकरणात् तथाचाधिकरणभेदेना-भावभेदात् साध्यवद्भिन्ने घटे वर्त्तमानस्य साध्याभावस्य प्रतियोगिव्यधिकरणस्य प्रतियोगिमति गगणे ऽसत्त्वादव्या-प्तेरभावात् । नचैवं साध्याभावेत्यत्र साध्यपदवैयर्थ्यं अ-भावाभावस्यातिरिक्तत्वेन द्रव्यत्वादेरभावत्वाभावात् साध्य-वद्भिन्नवृत्तिघटाभावादेस्तु हेतुमत्यसत्त्वादधिकरणभेदेनाभाव-भेदादितिवाच्यं यत्र प्रतियोगिसमानाधिकरणत्वप्रतियोगि-व्यधिकरणत्वलक्षणविरुद्धधर्म्माध्यासस्तत्राधिकरणभेदेनाभा-वभेदाभ्युपगमः नतु सर्व्वत्र तथाच साध्यवद्भिन्नवृत्तिघ-टाभावादेर्हेतुमत्यपि सत्त्वादसम्भववारणाय साध्यपदोपदानं

यद्वा घटाकाशसंयोगघटत्वान्यतराभावाभावोऽतिरिक्तः घटाकाशसंयोगघटत्वादीनामननुगततया तथात्वस्य वक्तुमशक्यत्वात्, घटत्वद्रव्यत्वाद्यभावाभावस्तु नातिरिक्तः घटत्वद्रव्यत्वादीनामनुगतत्वात् तथाच द्रव्यत्वादिमादायासम्भववारणाय साध्यपदमित्याहुः । इत्यास्तां विस्तरः ।

साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं । ३ ।

साध्यवत्प्रतियोगिकान्योन्येति । हेतौ साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणवृत्त्यभावइत्यर्थः । अन्योन्याभावश्च प्रतियोग्यवृत्तित्वेन विशेषणीयस्तेन साध्यवतो व्यासज्यवृत्तिधर्म्मावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तावपि नासम्भवः । नन्वेवमपि नानाधिकरणसाध्यके वह्निमान् धूमादित्यादौ साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तेरव्याप्तिर्दुर्व्वाराइति प्रतियोग्यवृत्तित्वमपहाय साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणेतु पञ्चमेन लक्षणेन सह पौनरुक्तमितिचेन्न । वक्ष्यमाणकेवलान्वय्यव्याप्तिवदस्यापि अत्र दोषत्वात् । नच तथापि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैवैतल्लक्षणघटकत्वे वक्ष्यमाणकेवलान्वय्यव्याप्तिरसंगता केवलान्वयिसाध्यकेऽपि साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य प्रसिद्धत्वादितिवाच्यं तत्र तादृशान्योन्याभावस्य प्रसिद्धत्वेऽपि तद्वति हेतोर्वृत्तेरेवाव्याप्तेर्दुर्व्वारत्वात् । यद्वा साध्यवत्प्रतियोगिकान्योन्याभावपदेन साध्य-

वत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाव एव विवक्षितः। नचैवं पञ्चमलक्षणाभेदः तत्र साध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाववत्त्वेन प्रवेशोऽत्रतु तादृशान्योन्याभावाधिकरणत्वेन इत्यधिकरणत्वप्रवेशाप्रवेशाभ्यामेव भेदात् अखण्डाभावघटकतया च नाधिकरणत्वांशस्यात्र वैयर्थ्यमिति न कोपि दोषइतिदिक्।

सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं ।४।

सकलेति। साकल्यं साध्याभाववतो विशेषणं तथाच यावन्ति साध्याभावाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतौ व्याप्तिरित्यर्थः। धूमाद्यभाववद्ध्रदादि, तन्निष्ठाभावप्रतियोगित्वाद्वन्हयादेरतिव्याप्तिरिति साकल्यं साध्याभाववतोविशेषणं साकल्यस्य साध्याभावविशेषणत्वे तत्तद्ध्रदादिवृत्तित्वादिरूपेण ये वह्न्याद्यभावास्तेषामपि सकलसाध्याभावमध्ये प्रवेशात् तावदधिकरणाप्रसिद्ध्याऽसम्भवापत्तेः। नच द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभाववति गुणादौ सत्त्वादेर्विशिष्टसत्त्वाभावादिप्रतियोगित्वसत्त्वादतिव्याप्तिरितिवाच्यं तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वस्येह विवक्षितत्वात् प्रतियोगिताच हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या तेन द्रव्यत्वाद्यभाववति गुणादौ सत्त्वादेः संयोगादिसम्बन्धावच्छिन्नाभावसत्त्वेपि नातिव्याप्तिः। साध्याभावश्च साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, अन्यथा पर्व्वतादेरपि वन्हयादेर्विशिष्टाभावसत्त्वेन समवायादिसम्बन्धावच्छिन्नवन्हयादिसामान्याभाववत्त्वेनच यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वा-

भावात् धूमादेरसम्भवः स्यात् । नच कपिसंयोग्येतत्वृक्षत्वादित्यादौ वृक्षस्यापि तादृशाभाववत्त्वेन यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावादेतत्वृक्षत्वस्याव्याप्तिरितिवाच्यं किञ्चिदनवच्छिन्नायाः साध्याभावाधिकरणताया इह विवक्षितत्वात् । इत्थञ्च किञ्चिदनवच्छिन्नायाः कपिसंयोगाभावाधिकरणताया गुणादावेव सत्त्वात् तत्रच हेतोरप्यसत्त्वान्नाव्याप्तिः । नच कपिसंयोगाभाववान् सत्वादित्यादौ साध्याभावस्य कपिसंयोगादे निरवच्छिन्नाधिकरणत्वाप्रसिद्ध्या अव्याप्तिरितिवाच्यं केवलान्वयिन्यभावादित्यनेन ग्रन्थकृतैवास्य दोषस्य वक्ष्यमाणत्वात् । नच पृथिवी कपिसंयोगादित्यादौ पृथिवीत्वाभाववति यावत्येव कपिसंयोगाभावसत्त्वादतिव्याप्तिरितिवाच्यं तन्निष्ठपदेन तत्र निरवच्छिन्नवृत्तिमत्त्वस्य विवक्षितत्वात् । इत्थञ्च पृथिवीत्वाभावाधिकरणे जलादौ यावदन्तर्गते निरवच्छिन्नवृत्तिमानभावः न कपिसंयोगाभावः किन्तु घटाद्यभाव एव तत्प्रतियोगित्वस्य हेतावसत्त्वान्नातिव्याप्तिः । नचैवं अन्योन्याभावस्य व्याप्यवृत्तितानियमनये द्रव्यत्वाभाववान् संयोगवद्भिन्नत्वादित्यादेरपि सद्धेतुतया तत्राव्याप्तिः संयोगवद्भिन्नत्वाभावस्य संयोगस्य निरवच्छिन्नवृत्तेरप्रसिद्धेरितिवाच्यं अन्योन्याभावस्य व्याप्यवृत्तितानियमवादिनये अन्योन्याभावस्याभावो न प्रतियोगितावच्छेदकस्वरूपः किन्त्वतिरिक्तव्याप्यवृत्तिः । अन्यथा मूलावच्छेदेन कपिसंयोगिभेदाभावाभानानुपपत्तिरिति संयोगवद्भिन्नत्वाभावस्यापि निरवच्छिन्नवृत्तिमत्त्वात् । वस्तुतस्तु सकलपदमत्राशेषपरं नत्वनेकपरं एतद्धटत्वाभाववान्

पटत्वादित्याद्यैकव्यक्तिविपक्षके साध्याभावाधिकरणस्य यावत्त्वाप्रसिद्धेरव्याप्त्यापत्तेः। तथाच किञ्चिदनवच्छिन्नाया निरुक्तसाध्याभावाधिकरणताया व्यापकीभूतोयोऽभावः हेतुतावच्छेदकसम्बन्धावच्छिन्नतत्प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वं लक्षणार्थः। नच सत्त्वादिसामान्याभावस्यापि प्रमेयत्वादिना निरुक्तसाध्याभावाधिकरणताव्यापकत्वात् द्रव्यं सत्वादित्यादावतिव्याप्तिः तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं व्यापकत्वमित्युक्तौ तु निर्धूमत्ववान् निर्व्वन्हित्वादावप्यव्याप्तिः निर्व्वन्हित्वाभावानां वन्हिव्यक्तीनां सर्व्वासामेव चालनीन्यायेन निर्धूमत्वाभावाधिकरणतावन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वादितिवाच्यं तादृशाधिकरणताव्यापकतावच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्वच्छिन्नप्रतियोगिताकाभावत्वं तद्धर्म्मवत्त्वस्य विवक्षितत्वात् व्यापकतावच्छेदकत्वञ्च तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वं नतु तद्वन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वं तद्वति निरवच्छिन्नवृत्तिमान् योऽभाव स्तत्प्रतियोगितानवच्छेदकत्वं वा प्रकृतव्यापकतायां प्रतियोगिवैयधिकरणस्य निरवच्छिन्नत्वस्य वा प्रवेशे प्रयोजनविरहात् तेन पृथिवी कपिसंयोगादित्यादौ नातिव्याप्तिः कपिसंयोगाभावत्वस्य निरुक्तव्यापकतावच्छेदकत्वविरहादित्येव परमार्थः॥

साध्यवदन्यावृत्तित्वंवा, केवलान्वयिन्यभावात्। ५।

साध्यवदन्येति। अत्रापि प्रथमलक्षणोक्तरीत्या हेतौ सा-

ध्यवदन्यवृत्तित्वाभाव इत्यर्थः। तादृशवृत्तित्वाभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः। तेन धूमवान् वन्हेरित्यादौ धूमवदन्यजलहृदादिवृत्तित्वाभावस्य धूमवदन्यवृत्तित्वजलत्वोभयाभावस्य च हेतौ सत्त्वेपि नातिव्याप्तिः। साध्यवदन्यत्वञ्चान्योन्याभावत्वनिरूपितसाध्यवत्त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं तेन वन्हिमान् धूमादित्यादौ तत्तद्वन्हिमदन्यस्मिन् धूमादे र्वृत्तावपि नाव्याप्तिः। एवं वन्हिमत्त्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य स्वावच्छिन्नभिन्नभेदस्याधिकरणे पर्व्वतादौ धूमस्य वृत्तावपि नाव्याप्तिः तस्य साध्यवत्तावच्छिन्नप्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वेन अन्योन्याभावत्वनिरूपितत्वविरहात् अन्योन्याभावत्वनिरूपितत्वञ्च तादात्म्यसम्बन्धावच्छिन्नत्वमेव। साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन वह्निमान् धूमादित्यादौ वह्निमत्त्वावच्छिन्नप्रतियोगिताकस्य समवायेन वह्निमतोऽन्योन्याभावस्याधिकरणे पर्व्वतादौ धूमादे र्वृत्तावपि नाव्याप्तिः सर्व्वमन्यत् प्रथमलक्षणोक्तदिशावसेयं, यथा तृतीयलक्षणेन सहाभेदो न तथोक्तं तत्रैवेतिसमासः। सर्व्वाण्येव लक्षणानि केवलान्वयिन्यव्याप्त्या दूषयति केवलान्वयिन्यभावादिति। पञ्चानामेव लक्षणानां इदं वाच्यं ज्ञेयत्वादित्यादिव्याप्यवृत्तिकेवलान्वयिसाध्यके संयोगाभाववान् सत्त्वादित्यादावव्याप्यवृत्तिकेवलान्वयिसाध्यकेचाभावादित्यर्थः। साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्तावच्छिन्नप्रतियोगिताकान्योन्याभावस्यचाप्रसिद्धत्वात्।

कपिसंयोगाभाववान् सत्त्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणस्याप्रसिद्धत्वाच्चेतिभावः । तृतीयलक्षणस्य केवलान्वयिसाध्यकासत्त्वञ्च तद्व्याख्यानावसर एव प्रपञ्चितं, एतच्चोपलक्षणं द्वितीये कपिसंयोग्येतद्वृक्षत्वादित्यत्राव्याप्तिः, अधिकरणभेदेनाभावभेदे मानाभावेन कपिसंयोगवद्भिन्नवृत्तिः कपिसंयोगाभावो द्रव्यवृत्तिकपिसंयोगाभाव एव तद्वति एतद्वृक्षत्वस्य वृत्तेः । नचसाध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववदवृत्तित्वं वक्तव्यंएवञ्चविशिष्टाभावाभावान्नाव्याप्तिरितिवाच्यं । साध्याभावपदवैयर्थ्यापत्तेः, साध्यवद्भिन्नवृत्तित्वविशिष्टाधिकरणावृत्तित्वस्यैव सम्यक्त्वात् । सद्धेतौ हेत्वधिकरणे विशिष्टाधिकरणत्वाभावादेवासम्भवाभावात् । तृतोये साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्य लक्षणघटकत्वे चालनीन्यायेनान्योन्याभावमादाय नानाधिकरणसाध्यके वह्निमान् धूमादित्यादावव्याप्तिरित्यपि द्रष्टव्यं ।

समाप्तोयं ग्रन्थः ।

परिशिष्टं ।

अथ निरुक्तप्रतियोगिताविशिष्टसाध्याभावत्वावच्छिन्न निरूपकताघटितवृत्तिसामान्याभावस्य लक्षणवाक्यार्थताया मथुरानाथानभिप्रेतत्वे, निरुक्तप्रतियोगितावच्छेदकत्वोपलक्षितोयः सम्बन्धः तत् सम्बन्धावच्छिन्ननिरूपकताघटितवृत्तिसामान्याभावस्य च तदभिप्रेतत्वे, सम्बन्धनिरुक्तौ साध्यताव-

च्छेदकावच्छिन्नाभाव निवेशे स्वरूपसम्बन्धस्यापि प्राप्ततया कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावसाध्यकात्मत्वरूपसद्धेतौ तत्सम्बन्धेन तादृश विशेष्यत्वरूपसाध्याभाववति आत्मनि हेतोर्वर्त्तमानत्वादव्याप्तिरितिलिखनं असङ्गतं स्यात् तादृशप्रतियोगितावच्छेदकत्वोपलक्षितत्वेन कालिकस्याऽपि प्राप्ततया तत्सम्बन्धावच्छिन्नसाध्याभावत्वावच्छिन्न निरूपकताघटित वृत्तिसामान्याभावस्य हेतौ सत्त्वेन दर्शिताव्याप्तेरनवकाशात् । नच सम्बन्ध निरुक्तौ साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाव निवेशात् प्राक् साध्यसामान्यीय प्रतियोगितावच्छेदकत्वेन उपलक्षितोयोय: सम्बन्ध स्तेन तेन सम्बन्धेनावच्छिन्नसाध्याभावत्वावच्छिन्न निरूपकताघटितवृत्तित्वसामान्याभावसमुदायस्यैव व्याप्तिपदार्थताया आवश्यकत्वं अन्यथा तादृश साध्यककालगगणगतद्वित्वादि व्यभिचारिहेतावतिव्याप्ति: स्यात् तादृशप्रतियोगिता वच्छेदकीभूत स्वरूप सम्बन्धेन साध्याभाववति आत्मनि तादृशहेतोरवृत्ते: एवंञ्च अव्याप्ति प्रदर्शनसङ्गति रिति वाच्यं । वह्निमान् धूमादित्यादौ स्वरूप सम्बन्धस्यैव साध्यीय प्रतियोगितावच्छेदकत्वेन प्राप्ततया तत्र दर्शित सम्बन्धावच्छिन्नसाध्याभावाधिकरणतावद्वृत्तित्व सामान्याभाव समुदायाप्रसिद्ध्या प्रसिद्धसद्धेतावव्याप्तिभयेन निरुक्तसमुदायनिवेशस्य शङ्कितु मशक्यत्वात् एवं दर्शितसमुदायज्ञानत्वेनानुमितिकारणत्वापेक्षया एकविधतादृशवृत्तिसामान्याभावज्ञानस्यैव कारणत्वावश्यकतया तादृशकारणतानिर्व्वाहाय सम्बन्धस्यानुगतैक्तौ साध्यसामान्याभावनिवेशावश्यकत्वमेवायातं एवञ्चतदनिवेशे दर्शिताव्याप्तिदान प्रयासवैफल्यात् गुरुरूपेण दर्शितव्याप्तिद्वय ज्ञानत्वेन कारणत्व शङ्कायाप्यनुत्थितिरिति चेन्न दर्शितहेत

साध्यकस्थले कालिकसम्बन्धावच्छिन्नसाध्याभावत्वावच्छिन्न-निरूपकताकाधिकरण वृत्तित्वाभावस्यैव लाघवात व्याप्तित्व-सम्भवेन भवदुक्तनिरूपकताघटितवृत्तित्वाभावस्यातिगुरुत्वेन अ-नुमित्यनुपयोगित्वात् अथ निरुक्तप्रतियोगितावच्छेदकत्वोप-लक्षित सम्बन्धावच्छिन्ननिरूपकताघटितवृत्तिसामान्याभावस्य व्याप्तित्वे कालिक सम्बन्धावच्छिन्ननिरूपकताया अपि प्राप्तत्वेन तद्घटितवृत्तिसामान्याभावस्य आत्मत्वहेतौ सत्त्वेन सम्बन्धनि-रुक्तौ साध्यतावच्छेदकसम्बन्धावच्छिन्न साध्याभावानिवेशेऽपि कथमुक्तहेतावव्याप्तिः प्रत्युत तादृशसाध्यककालगगणादिगत-द्वित्वादिहेतावतिव्याप्तिरेवेतिनाशङ्क्यं यतः निरुक्तविशेष्य-त्वाभावसाध्यकात्मत्वहेतावव्याप्तिरित्यादिग्रन्थस्यायमेवतात्पर्य्य विषयो ऽर्थः यथा लक्षणवाक्यलब्धायाः कालिकसम्बन्धावच्छिन्न निरुक्तसाध्याभावत्वावच्छिन्न निरूपकताघटितवृत्तित्वाभाव रू-पव्याप्तेः आत्मत्वे सत्त्वेऽपि तद्वाक्य लब्धाया स्वरूप सम्ब-न्धावच्छिन्ननिरुक्तनिरुपकताघटितवृत्तित्वाभावरूपव्याप्तेर्न त-त्र सत्त्वं प्रत्युत कालगगणादिगतद्वित्वादिरूपं व्यभिचारि-ण्येव तस्याः सत्त्वं इत्थञ्च तादृश व्याप्त्युपरागेण कालगग-णादिगत द्वित्वस्य हेतुतावच्छेदक समवाय सम्बन्धेन काले सत् परामर्शात् तादृशप्रमाविशेष्यत्वाभाव साध्यकप्रमानुमित्या-पत्तिरित्येव प्रकृतग्रन्थभावार्थः। नच व्याप्त्युपरागेण प्रकृत-हेतु परामर्शस्यैवानुमितिजनकतया कुतः कालगगणादिगतद्वि-त्वपरामर्शो दर्शितसाध्यहेतुकानुमितिजनको भवेदितिवाच्यं। हेत्वघटितव्याप्तेरपि मथुरानाथेनोक्तत्वात्। अतएव कालिक सम्बन्धावच्छिन्न विषयत्वाभावस्य तत् सम्बन्धावच्छिन्न ज्ञान विषयत्वाभावस्य वा साध्यत्वमुपेक्ष्य आत्मत्वप्रकारकप्रमाविशे-ष्यत्वस्य कालिक सम्बन्धेन अभावः अतिगुरुशरीरोपि साध्य-

त्वेन प्रदर्शितः । उक्तलघु शरीरे साध्यद्वयानुमितेरापत्तिप्रयोजकतया अभिमतस्य दर्शितरीत्यासत्परामर्शस्यालीकत्वात् स्वरूप सम्बन्धेन दर्शित लघुशरीर साध्याभावस्य सर्व्वत्रसत्त्वेन ततसम्बन्धेन तद्वद्समवेतस्य कस्यापि हेतुतावच्छेदकसमवाय सम्बधेन सत्परामर्शस्याप्रसिद्धेः ।

कालिक सम्बन्धेन व्यतिरेक्यभावस्याव्याप्यवृत्तित्ववादिनां प्राचां मतमवलम्ब्य दर्शितविशेष्यत्वाभावस्य साध्यत्वमुक्तं अतस्तत् साध्यस्याकेवलान्वयित्वेन तादृशहेतौ नां लक्ष्यत्वशङ्का अतएव सिद्धान्तलक्षणदीधितौ नवीना इत्यादिना कालिक सम्बन्धेन तादृशसाध्यकस्थले प्रतियोगिवैयधिकरण्यसार्थक्यं प्रदर्शितं इति सुधीभिर्निपुणमवधेयं ।

वस्तुतस्तु तादृश प्रमाविशेष्यत्वाभावे साध्ये आत्मत्वं व्याप्यमितिवदात्मत्वं नव्याप्यमितिव्यवहारापत्तावेव तद्ग्रन्थतात्पर्य्यं सम्बन्धपरिचायकशरीरे साध्यसामान्याभावनिष्ठत्वाप्रवेशे लक्षणवाक्यतः स्वरूपसम्बन्धेन साध्याभाववदवृत्तित्वस्य कालगगणपरिमाणादौ प्रसिद्धस्याभाववत्तायाः प्रकृतहेतौ प्रसिद्धत्वात् हेत्वघटितव्याप्तौ गगणादौ व्याप्यत्वव्यवहारवारणार्थं हेतुताघटक सम्बन्धेन वृत्तिमत्त्वस्यापि व्याप्तिशरीरे निवेशनीयतया दर्शितविषयत्वाभावादिसाध्यके न तद्व्यवहारापत्तिः सम्भवति तत्र तादृशव्याप्तेरप्रसिद्धत्वात् अतो गुरुशरीरस्यापि तादृशसाधस्यानुसरणं इतिपररपरिशीलितोऽयं पन्था इत्यस्मदगुरुचरणा ॥

इति श्रीप्रमथनाथ तर्कभूषण भट्टाचार्य्यसङ्कलितव्याप्तिपञ्चकटीकारहस्यविवृतिः सम्पूर्णा ।

शिवमस्तु ॥

विज्ञापन।

यह पुस्तक शहर बनारस बङ्गालीटोला खालिसपु
पण्डित प्रियनाथ भट्टाचार्य्य के पास मिलेगा।

मूल्य ≈)॥ डाक मासुल)॥ आध आना।

शक्तिवाद रहस्य प्रकाश।

महामहोपाध्याय गदाधर भट्टाचार्य्य कृत शक्तिवाद ग्रन्
के उपर महामहोपाध्याय राखालदास न्यायरत्न कृत य
अत्युत्तम टीका मूल्य ।) डाक मासुल आध आना। यह पुस्त
उपरि लिखित ठिकाने मे मिलेगा।